শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী ৱাদিরাজযতি কৃতং

# ॥ শ্রী শ্রীশগুণদর্পণস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী শ্রীশগুণদর্পণস্তোত্রম্ ॥

যা সুগন্ধাস্যনাসাদিনৱদ্ৱারাঽখিলেন যা।
দুরাধর্ষা সর্ৱসস্যোদযার্থং যা করীষিণী॥ 1 ॥

যা নিত্যপুষ্টা সর্ৱাঙ্গৈঃ সৌন্দর্যাদিগুণৈরপি।
ঈশ্ৱরীং সর্ৱভূতানাং তামিহোপহ্ৱযে শ্রিযম্॥ 2 ॥

মাতর্লক্ষ্মি নমস্তুভযং মাধৱপ্রিযভামিনি।
যুৱাং ৱিশ্ৱস্য পিতরাৱিতরেতরযোগিনৌ॥ 3 ॥

সমনা কিল মাতস্ত্ৱমমুনা তদযোগিনী।
মম নাথেন নৈৱ স্যা ৱিমনাশ্চ ন স ৎৱযি॥ 4 ॥

ৎৱং ৱেদমানিনী ৱেদৱেদ্যঃ কিল স তে প্রিযঃ।
ৎৱং মূলপ্রকৃতির্দেৱী স দিৱ্যপুরুষঃ কিল॥ 5 ॥

যস্ত্ৱামুরসি ধত্তেঽম্ব কৌস্তুভদ্যুতিভাসিতে।
স ৎৱাং নৈৱাচ্যুতঃ সর্ৱস্যাত্যযে সত্যপি ত্যজেৎ॥ 6 ॥

দেৱি ৎৱং ললনারত্নং দেৱোঽসৌ পুরুষোত্তমঃ।
যুৱাং যুৱানৌ সততং যুৱযোর্ন ৱযোঽধিকঃ॥ 7 ॥

ৎৱং পদ্মিনী পদ্মৱক্ত্রা পদ্মাক্ষী পদ্মৱিষ্টরা।
পদ্মদ্ৱযকরা পদ্মকোশাভস্তনশোভনা॥ 8 ॥

পদ্মহস্তা পদ্মপাদা পদ্মনাভমনঃপ্রিযা।
পদ্মোদ্ভৱস্য জননী পদ্মা চ ৱরৱর্ণিনী॥ 9 ॥

অম্বাং পীতাম্বরশ্রোণীং লম্বালকলসন্মুখীম্।
বিম্বাধরোষ্ঠীং কস্তূরীজম্বালতিলকাং ভজে॥ **10**॥

রত্নোদ্দীপ্তসুমাঙ্গল্যসূত্রাৱৃতশিরোধরাম্।
কুণ্ডলপ্রভযোদ্দণ্ডগণ্ডমণ্ডলমণ্ডিতাম্॥ **11**॥

কুচকঞ্চুকসঞ্চারিহারানীকমনোহরাম্।
কাঞ্চীকিঙ্কিণিমঞ্জীরকঙ্কণাদ্যৈরলঙ্কৃতাম্॥ **12**॥

সুৱর্ণমণ্ডপে রত্নচিত্রসিংহাসনোত্তমে।
নমামি হরিণা সাকমিন্দিরাং কৃতমন্দিরাম্॥ **13**॥

ব্রহ্মাদ্যা ৱিবুধশ্রেষ্ঠা ব্রহ্মাণ্যাদ্যাঃ সুরাঙ্গনাঃ।
যাং পূজযন্তি সেৱন্তে সা মাং পাতু রমা সদা॥ **14**॥

সৰ্ৱালঙ্কারভরিতৌ সৰ্ৱসদ্গুণমণ্ডিতৌ।
শৰ্ৱাদিসৰ্ৱভক্তৌঘসৰ্ৱসম্পদ্বিধাযকৌ॥ **15**॥

সুমুখৌ সুন্দরতরৌ সুনাসৌ সুখচিত্তনূ।
সুরারাধিতপাদাব্জৌ রমানারাযণৌ স্তুমঃ॥ **16**॥

চতুষ্কপর্দা যা দেৱী চতুরাস্যাদিভিঃ স্তুতা।
চতুর্ৱেদোদিতগুণা চতুর্মূর্তের্হরেঃপ্রিযা॥ **17**॥

ঘৃতপ্রতীকাং তাং নিত্যং ঘৃতপূর্ণান্নদাযিনীম্।
যথেষ্টৱিত্তদাত্রীং চ নতোঽস্ম্যভযদাং শ্রিযম্॥ **18**॥

ৱাদিরাজেন রচিতং শ্রীশ্রীশগুণদর্পণম্।
ইমং স্তৱং পঠন্ মর্ত্যঃ শ্রীমান্ স্যান্নাত্র সংশযঃ॥ **19**॥

॥ শ্রী শ্রীশগুণদর্পণস্তোত্রং সমাপ্তম্॥